॥ वाल्मीकि रामायण॥

५ सुन्दरकाण्ड

अध्याय ५१

ततो जाम्बवतो वाक्यमगृह्णन्त वनौकसः ।
अङ्गदप्रमुखा वीरा हनूमांश्च महाकपिः ॥ १॥

प्रीतिमन्तस्ततः सर्वे वायुपुत्रपुरःसराः ।
महेन्द्राग्रं परित्यज्य पुप्लुवुः प्लवगर्षभाः ॥ २॥

मेरुमन्दरसङ्काशा मत्ता इव महागजाः ।
छादयन्त इवाकाशं महाकाया महाबलाः ॥ ३॥

सभाज्यमानं भूतैस्तमात्मवन्तं महाबलम् ।
हनूमन्तं महावेगं वहन्त इव दृष्टिभिः ॥ ४॥

राघवे चार्थनिर्वृत्तिं भर्तुश्च परमं यशः ।
समाधाय समृद्धार्थाः कर्मसिद्धिभिरुन्नताः ॥ ५॥

प्रियाख्यानोन्मुखाः सर्वे सर्वे युद्धाभिनन्दिनः ।
सर्वे रामप्रतीकारे निश्चितार्था मनस्विनः ॥ ६॥

प्लवमानाः खमाप्लुत्य ततस्ते काननौक्षकः ।
नन्दनोपममासेदुर्वनं द्रुमलतायुतम् ॥ ७॥

यत्तन्मधुवनं नाम सुग्रीवस्याभिरक्षितम् ।
अधृष्यं सर्वभूतानां सर्वभूतमनोहरम् ॥ ८॥

यद्रक्षति महावीर्यः सदा दधिमुखः कपिः ।
मातुलः कपिमुख्यस्य सुग्रीवस्य महात्मनः ॥ ९॥

ते तद्वनमुपागम्य बभूवुः परमोत्कटाः ।
वानरा वानरेन्द्रस्य मनःकान्ततमं महत् ॥ १०॥

ततस्ते वानरा हृष्टा दृष्ट्वा मधुवनं महत् ।
कुमारमभ्ययाचन्त मधूनि मधुपिङ्गलाः ॥ ११॥

ततः कुमारस्तान्वृद्धाञ्जाम्बवत्प्रमुखान्कपीन् ।
अनुमान्य ददौ तेषां निसर्गं मधुभक्षणे ॥ १२॥

ततश्चानुमताः सर्वे सम्प्रहृष्टा वनौकसः ।
मुदिताश्च ततस्ते च प्रनृत्यन्ति ततस्ततः ॥ १३॥

गायन्ति के चित्प्रणमन्ति के चिन्
नृत्यन्ति के चित्प्रहसन्ति के चित् ।
पतन्ति के चिद्विचरन्ति के चित्
प्लवन्ति के चित्प्रलपन्ति के चित् ॥ १४॥

परस्परं के चिदुपाश्रयन्ते
परस्परं के चिदतिब्रुवन्ते ।
द्रुमाद्द्रुमं के चिदभिप्लवन्ते
क्षितौ नगाग्रान्निपतन्ति के चित् ॥ १५॥

महीतलात्के चिदुदीर्णवेगा
महाद्रुमाग्राण्यभिसम्पतन्ते ।
गायन्तमन्यः प्रहसन्नुपैति
हसन्तमन्यः प्रहसन्नुपैति ॥ १६॥

रुदन्तमन्यः प्ररुदन्नुपैति
नुदन्तमन्यः प्रणुदन्नुपैति ।
समाकुलं तत्कपिसैन्यमासीन्
मधुप्रपानोत्कट सत्त्वचेष्टम् ।
न चात्र कश्चिन्न बभूव मत्तो
न चात्र कश्चिन्न बभूव तृप्तो ॥ १७॥

ततो वनं तत्परिभक्ष्यमाणं
द्रुमांश्च विध्वंसितपत्रपुष्पान् ।
समीक्ष्य कोपाद्दधिवक्त्रनामा
निवारयामास कपिः कपींस्तान् ॥ १८॥

स तैः प्रवृद्धैः परिभर्त्स्यमानो
वनस्य गोप्ता हरिवीरवृद्धः ।
चकार भूयो मतिमुग्रतेजा
वनस्य रक्षां प्रति वानरेभ्यः ॥ १९॥

उवाच कांश्चित्परुषाणि धृष्टम्
असक्तमन्यांश्च तलैर्जघान ।
समेत्य कैश्चित्कलहं चकार
तथैव साम्नोपजगाम कांश् चित् ॥ २०॥

स तैर्मदाच्चाप्रतिवार्य वेगैर्
बलाच्च तेनाप्रतिवार्यमाणैः ।
प्रधर्षितस्त्यक्तभयैः समेत्य
प्रकृष्यते चाप्यनवेक्ष्य दोषम् ॥ २१॥

नखैस्तुदन्तो दशनैर्दशन्तस्
तलैश्च पादैश्च समाप्नुवन्तः ।
मदात्कपिं तं कपयः समग्रा
महावनं निर्विषयं च चक्रुः ॥ २२॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com